दिनाङ्कः - 09.11.2024

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

- महाराष्ट्र-झारखण्ड राज्ययो: निर्वाचनप्रचाराभियानं सजवं प्रवर्तते, दलानां शीर्षनेतार: राज्ययो: जनसभां पथप्रदर्शनानि च कुर्वन्ति।
- उपराष्ट्रपतिना जगदीप-धनखडेन उक्तं यत् शिक्षायां निवेशः समाजसेवायाः सर्वाधिका प्रभावपूर्णा रीतिरस्ति।
- उत्तराखण्डे अद्य राज्यस्थापना-दिवसस्य रजतमहोत्सवः महतोल्लासेन परिपाल्यते।
- भारतस्य पंकज आडवाणी कतर-देशस्य दोहायां आई.बी.एस.एफ. इति विश्व बिलियर्डस् प्रतिस्पर्धां विजितवान्।
- भारतीय-पुरुष-हॉकी-दलस्य नायकः हरमनप्रीत-सिंह: ऐषमः एफ.आई.एच. प्लेयर ऑफ द ईयर इति पुरस्काराय अथ च प्राक्तन् हॉकी क्रीडकः पी.आर. श्रीजेशः गोलकीपर ऑफ द ईयर इति पुरस्काराय प्रचितौ।

<u>महाराष्ट्रे निर्वाचनम्</u>

महाराष्ट्रे भारतीयजनतापार्टीति दलस्य वरिष्ठो नेता प्रधानमन्त्री च नरेन्द्रमोदी उक्तवान् यत् केन्द्रसर्वकारेण अमरावत्यां टेक्सटाइलपार्क इति वस्त्रोद्यानस्य आधारशिलां स्थापयित्वा कार्पासोत्पादकाणां कृषकाणां कृते उद्योगाणां आधारभूतसंरचनाया: प्रवर्धनं कृतम्। श्रीमोदी अवदत् यत् वस्त्रोद्यानम् कार्पासकृषकाणां समृद्धेः मार्गं प्रशस्तं करिष्यति।

अकोलायां विदर्भ-क्षेत्रस्य स्वीयां प्रथम-निर्वाचनसभां सम्बोधयन् श्रीमोदी अवदत् यत् तृतीयकार्यकाले तस्य सर्वकारेण कोट्यावत् रूप्यकाणां मूल्यानां नैकाः विकासपरियोजनाः समारब्धाः। यासु महाराष्ट्रे बहवः आधारभूत-संरचना-परियोजनाः सम्मिलिताः सन्ति। सः विदर्भे सिञ्चन-परियोजनानां महत्त्वं प्रकाशितवान्। प्रधानमन्त्री अवदत् यत् प्राक्तन् महाविकासाघाडी-सर्वकारेण देवेन्द्र-फडणवीस-सर्वकारस्य महत्त्वाकांक्षिणः सिञ्चनपरियोजना: स्थगिता:। राज्ये महायुतिगठबन्धनस्य पुनः सत्ताप्राप्तेः अनन्तरं वैनगंगा नलगंगा अथ पेनगंगा इन्टरलाईन इति परियोजना स्वीकृता। इयं परियोजना नागपुर, वर्धा मण्डलं च समेत्य पश्चिम विदर्भस्य सर्वाणि पञ्च मन्डलानि सिञ्चनप्रणाल्याः आधीना भविष्यति। श्रीमोदिना एतदपि सूचितं यत् तस्य सर्वकारेण मराठीभाषा शास्त्रीयभाषायाः श्रेण्यां सम्मिलिता। येन महाराष्ट्रस्य प्रतिष्ठा उन्नताभवत्। अवधेयं वर्तते यत् अस्मिन् मासे विंशतिः दिनाङ्के राज्ये मतदानं भविष्यति।

<u>झारखण्ड -प्रचारः</u>

झारखण्डे विधानसभा-निर्वाचन-प्रचाराभियानं तीव्रगत्यां प्रचलति। एनडीए-I.N.D.I.A इत्येतयोः नेतारः स्वपक्षस्य प्रत्याशिनां पक्षे मतदातृन् आकर्षयितुं राज्ये जनसभाः कुर्वन्ति। पलामू-नगरस्य छतरपुरे एकां निर्वाचनसभां सम्बोधयन् भाजपा-दलस्य वरिष्ठो नेता अमितशाहः उक्तवान् यत् काङ्ग्रेसनेता राहुलगान्धि ओबीसी, दलित, आदिवासीविरोधी अस्ति। अपरत्र काङ्ग्रेस-नेता राहुलगान्धी भाजपा-दलस्य

कर-नीतीनाम् आलोचनां कृतवान्, उक्तं च यत् भाजपा-नेतृत्वे निर्धनानाम् अपेक्षया धनिनः अनुकूलतां भजन्ति। धनबाद-मण्डलस्य बाघमारा-नगरे निर्वाचनसभां सम्बोधयन् राहुलगान्धी आरोपितवान् यत् अनुसूचित-जनजातयः अनुसूचितजातयः अन्ये च वंचितवर्गाः देशस्य बहुमतं जनयन्ति, परन्तु तेषां सर्वकारीय-संस्थासु पर्याप्तरूपेण प्रतिनिधित्वं नास्ति।

उपराष्ट्रपतिः दीक्षान्तमहोत्सवः

उपराष्ट्रपतिना जगदीप-धनखडेन उक्तं यत् शिक्षायां निवेशः समाजसेवायाः सर्वाधिका प्रभावपूर्णा रीतिरस्ति। तेनोक्तं यत् अनेन मानव-संसाधनं समृद्धं भवति सहैव अस्माकं वर्तमानः भविष्यं सुरक्षिते भवतः। अद्य राजधान्यां नवदिल्ल्यां राष्ट्रीय- प्रौद्योगिकी-संस्थानस्य चतुर्थ-दीक्षान्त-समारोहस्य आध्यक्ष्यं निर्वहन् श्रीधनखडः एतत् वक्तव्यम् अयच्छत्। अपि च उक्तं यत् शिक्षा देशस्य समृद्धं पुरतनं च रिक्थं पुनः अन्वेष्टुं शक्तिं प्रददाति ।

उत्तराखण्ड-स्थापना दिवस

उत्तराखण्डे अद्य राज्य-स्थापना दिवसः महतोल्लासेन परिपाल्यते। राज्यस्य स्थापनायाः अयं रजतमहोत्सवः अपि विद्यते। उपराष्ट्रपतिः जगदीप-धनखडः प्रधानमन्त्री नरेन्द्र-मोदी गृहमन्त्री अमितशाहश्च उत्तराखण्ड-वासिभ्यः शुभकामनाः प्रदत्तवन्तः। अत्रावसरे सामाजिक-सञ्चारपटले उपराष्ट्रपतिना उक्तं यत् उत्तराखण्डाय प्राचीन-सौन्दर्यस्य आध्यात्मिक-समृद्धेः च आशीर्वादः वर्तते । अमुना कामना कृता यत् धन्यं राज्यं वृद्धिं लसेत्। उत्तरोत्तर-प्रगतिं विकासं च लभेत्। प्रधानमन्त्रिणा नरेन्द्रमोदिना विकासे उत्कृष्ट-प्रगतये उत्तराखण्डस्य प्रशंसा कृता। उत्तराखण्डस्य पञ्चविंशे स्थापना-दिवसावसरे राष्ट्रम् आभासीय-माध्यमेन सम्बोधयन् प्रधानमन्त्री अवोचत् यत् राष्ट्रं भाविन्यां पञ्चविंशति-वर्षेषु विकसित-भारताय विकसितो-त्तराखण्डस्य सङ्कल्पं पूरयत् द्रक्ष्यति।

केन्द्रीय-गृह-मन्त्रिणा अमितशाहेनापि राज्यस्थापना-दिवसावसरे उत्तराखण्डस्य वासिभ्यः शुभकामनाः प्रदत्ताः।

प्रधानमन्त्री-रतन-टाटा

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् उद्योगपतिः समाजसेवी च रतन टाटा वर्यस्य जीवनं प्रेरयति यत् नेतृत्वं न केवलं निजोपलब्धिभिः अपितु अत्यन्तं दुर्बलानाम् परिचर्यायाः क्षमताधारेण माप्यते। एकस्मिन् OPED इति राष्ट्रिय-दैनिकपत्रे श्रीमोदी अवदत् यत् रतन टाटा वर्यस्य देहावसानस्य एकमासः अभवत् किन्तु तस्य अनुपस्थितिः समाजस्य प्रत्येकस्मिन् क्षेत्रे न केवलं राष्ट्रे अपितु सम्पूर्णे विश्वेस्मिन् अनुभूयते। प्रधानमन्त्रिणा रतनटाटा वर्यस्य योगदानस्य स्मरणं विधाय उक्तं यत् विगतेषु केषुचित् वर्षेषु टाटा देशस्य स्टार्टअप पारिस्थितिकी-तन्त्रस्य मार्गदर्शनाय प्रसिद्धः अभवत्।

-

-

**विरामः**

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

**रेलयान-सञ्चालनम्**

पूर्वी-मध्यरेलवे सम्भागः छठ पूजायाः अनन्तरं बिहारात् प्रत्यागन्तृणां यात्रिणां सम्मर्दं निध्याय आगामि पञ्चदश-दिनावधौ षड्-चत्वारिंशदुत्तर-चतुः शत् विशेष-रेलयानानां सञ्चालनं करिष्यति। यात्रिणां सुविध्याय एतेषां विशेष-रेल-यानानां सञ्चालनं गतदिनात् आरब्धम्। आकाशवाण्या सह रेल-विभागस्य मुख्य-जनसम्पर्काधिकारी सरस्वती चन्द्रः अवोचत् यत् अस्मिन् वर्षे यात्रिणां समेधितां सङ्ख्यां निध्याय गतवर्षस्य तुलनायां सप्तितितोधिकानि अतिरिक्त-रेलयानानि सञ्चाल्यन्ते। सुगम-प्रबन्धनाय पटना-दानापुर-राजेन्द्रनगर-समस्तीपुर-प्रभृति-प्रमुख-रेल-स्थानकेषु विशेष-व्यवस्थाः सन्ति।

**प्रशासनं हजयात्रा**

सर्वकारेण हज-यात्रां सुगमां विधातुं डिजिटल इति आङ्किकाधारभूत-संरचनायां महत्त्वपूर्णं परिष्कारं कृत्वा नैके पदक्षेपाः समुत्थापिताः। एतैः पदक्षेपैः महिलानां समानता समेधिता। येन अधिकाः महिलाः स्वतन्त्र-रूपेण हज-यात्रायां गन्तुं शक्नुवन्ति। विशेषतया न्यूनाय-युतेभ्यः हज- यात्रां सुगमां कर्तुं प्रावधानानि कृतानि। महिलाभ्यः सुगम्यतां भद्रतरां कर्तुं हज-यात्रि-सहायता-कार्यक्रमः आरब्धः।

**विश्व बिलियर्डस् प्रतिस्पर्धा**

भारतस्य पंकज आडवाणी कतर-देशस्य दोहायां आई.बी.एस.एफ. इति विश्व बिलियर्डस् प्रतिस्पर्धां विजितवान्। निर्णायक-स्पर्धायां तेन इंग्लैण्डस्य रॉबर्ट हॉल इत्यसौ पराजितः। शृङ्खलायां भारतस्य सौरभ-कोठारी कांस्य-पदकं विजितवान् ।

**हॉकी-पुरस्कारः**

भारतीय-पुरुष-हॉकी-दलस्य नायकः हरमनप्रीत-सिंहेन ऐषमः एफ.आई.एच. प्लेयर ऑफ द ईयर इति पुरस्कारः विजितः। सममेव प्राक्तन् हॉकी क्रीडकः पी.आर. श्रीजेशः गोलकीपर ऑफ द ईयर इति पुरस्काराय चितः। हरमनप्रीताय श्रीजेशाय च गतदिने ओमाने ऊनपञ्चाशो एफ.आई.एच. वैधानिक कांग्रेस इत्यनेन सम्मानः प्रत्ततः। द्विवारम् ओलम्पिक-क्रीडासु कांस्य-पदक-विजेत्रा हरमनप्रीतेन निजश्रेण्यां प्रतिशतं त्रिषष्टिमिताधिकम् अथ च श्रीजेशेन प्रतिशतं द्विषष्टिमिताधिकं मतं प्राप्तम्।

**क्रिकेट**

श्रीलङ्का न्यूजीलैण्ड-दलयोः विंशतिं प्रतिविंशतिः क्रिकेट्-शृङ्खला अद्य आरभते। शृङ्खलायाः प्रथमा स्पर्धा अद्य श्रीलङ्कायाः दाम्बुला अन्ताराष्ट्रिय-क्रीडाङ्गणे भविष्यति। भारतीय-समयानुसारेण सायं सप्तवादने क्रीडारप्स्यते।

।।इति वार्ता:।।